संस्कृत वार्ता:

दिनाङ्क : 08.09.2026 सायम् - 06:20

मुख्यवार्ता:

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य गुजरातस्य वडोदरायां पञ्चत्रिंशत्सहस्र-कोटिरूप्यतोप्यधिकमूल्यानां विभिन्नविकासपरियोजनानाम् उद्घाटनं शिलान्यासः च कृतः; उक्तं च यत् भारतं वैश्विकोत्पादन-केन्द्ररूपेण उदितम् अस्ति ।
- मुम्बय्यां प्रधानमन्त्री नरेन्द्र-मोदी षड्विंशत्यधिक-द्विसहस्रतमस्य ग्लोबल-फिनटेक्-फेस्ट् इत्यस्य अद्य उद्घाटनं विधास्यति ।
- बॉम्बे-उच्चन्यायालयेन अद्य प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति नवदशोत्तरद्वि-सहस्रतमे वर्षे प्रदत्तं वक्तव्यं सम्बद्धे मानहानिप्रकरणे काङ्ग्रेस्-सांसदस्य राहुलगान्धिनः विरुद्धं प्रख्यापितस्य समाह्वानपत्रस्य निरस्तीकरणं निराकृतम्।
- रक्षामन्त्री राजनाथसिंहः अद्य त्रिदिवसीय-श्रीलङ्कायात्रायै कोलम्बोनगरं सम्प्राप्तवान्।
- अहमदाबादे अनुष्ठीयमानायाम् ऐषमः विश्व-दिव्याङ्ग-धनुर्क्रीडायां, भारतेन द्वे स्वर्णपदके एकं रजतपदकं च अधिगतम्।

प्रधानमन्त्री - गुजरात-महाराष्ट्र-यात्रा

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य गुजरातस्य वडोदरायां पञ्चत्रिंशत्सहस्र-कोटिरूप्यतोप्यधिकमूल्यानां विभिन्नविकासपरियोजनानाम् उद्घाटनं शिलान्यासः च कृतः। प्रधानमन्त्रिणा पश्चिम-समर्पित-मालवाहक-मार्गस्य त्रयः प्रमुखाः खण्डाः राष्ट्राय समर्पिताः, येन मालवाहक-मार्गजालस्य पूर्णं परिचालनं सम्भविष्यति। प्रधानमन्त्री मोदी न्यू-साणन्द्, न्यू-मकरपुरा, न्यू-उम्बरगाँव् तथा न्यू-जेएनपीटी इत्येतेभ्यः स्थलेभ्यः मालवाहक-रेलयानसेवानां हरितध्वजं प्रदर्श्य शुभारम्भं कृतवान्। तेन टाण्डा-मार्गस्य वडोदरायाः च मध्ये नवीनयात्रि-रेलसेवायाः शुभारम्भः अपि कृतः। एषा सेवा अलीराजपुरस्य दूरस्थेषु जनजातीयक्षेत्रेषु राष्ट्रीय-रेल-जालस्य सम्पर्कं स्थापयिष्यति।

विशालं जनसमूहं सम्बोधयन् प्रधानमन्त्री उक्तवान् यत् भारतं वैश्विकोत्पादन-केन्द्ररूपेण उदितम् अस्ति तथा अधुना देशः स्वयमेव उन्नतयोः रेल-मेट्रो चेत्येतयोः यानयोः कक्षनिर्माणं करोति।

प्रधानमन्त्री उक्तवान् यत् अस्याः परियोजनायाः परिकल्पना षडधिकद्विसहस्रतमे वर्षे कृता आसीत्, किन्तु सा बहूनि वर्षाणि निष्क्रियावस्थायाम् आसीत्। तद्विपरीतं गतदशके द्रुतगतिना कृतस्य कार्यान्वयनस्य फलस्वरूपं राष्ट्रियापूर्ति-व्यवस्था पूर्णतया परिवर्तिता अस्ति। अद्य अयं मालवाहक-मार्गः द्रुतगत्या विकासमानस्य भारतस्य जीवनरेखारूपेण कार्यं करोति।

प्रधानमन्त्रिणा उक्तं यत् मालवाहनस्य यात्रि-रेलमार्गेभ्यः पृथक्करणेन कार्यक्षमतायां महत्त्वपूर्णः परिष्कारः अभवत्। यात्राकाले महन्न्यूनतया इन्धनस्य पर्याप्तं संरक्षणं भवति, पर्यावरणे दुष्प्रभावः न्यूनीभवति, सम्पूर्णराष्ट्राय च द्रुततरा स्वच्छा च आपूर्तिव्यवस्था स्थापिता भवति।

कार्यक्रमावधौ प्रधानमन्त्री मोदी सप्तनवतिशतकोटि-रूप्यतोप्यधिकमूल्यानां त्रयाणां रेलविस्तार-परियोजनानां शिलान्यासमपि कृतवान्। मुम्बय्यां प्रधानमन्त्री नरेन्द्र-मोदी षड्विंशत्यधिक-द्विसहस्रतमस्य ग्लोबल-फिनटेक्-फेस्ट् इत्यस्य अद्य उद्घाटनं विधास्यति ।

अस्य वार्षिक-सम्मेलनस्य सप्तमं संस्करणम् अद्य समारब्धं सत् आगामिनि सितम्बरमासस्य एकादश-दिनाङ्के समाप्तिमेष्यति।

प्रधानमन्त्री–नवसारी

प्रधानमन्त्री नरेन्द्रमोदी अद्य सामाजिकसेवां स्वच्छतां च प्रभावि-दैनन्दिन-आचरणरूपेण स्वीकर्तुम् अथ विकासयोजनानां लाभं समाजस्य प्रति प्रापयितुं च नागरिकेभ्यः जनप्रतिनिधिभ्यश्च आह्वानं कृतवान्। प्रधानमन्त्रिणा नवसारी इत्यत्र नवनिर्मितस्य भाजपाकार्यालयस्य उद्घाटनानन्तरम् आयोजिता विशालजनसभा सम्बोधिता।

प्रधानमन्त्री-स्वनिधियोजनायाः परिवर्तनकारिप्रभावस्य उल्लेखं कुर्वन् प्रधानमन्त्री उक्तवान् यत् अनया योजनया लघुमार्गविक्रेतृभ्यः पथविक्रेतृभ्यश्च सुलभऋणस्य अथ आधुनिक-अङ्कीय-देयसौविध्यानां च सुलभप्राप्तिं सुनिश्चित्य वित्तीयसमावेशनं प्रवर्धितम्। जनस्वास्थ्यस्य स्वच्छतायाश्च महत्त्वं प्रतिपादयन् प्रधानमन्त्री स्वागमनात् पूर्वं स्थानीयप्रशासनेन निवासिभिश्च सञ्चालितस्य व्यापकस्य सूक्ष्मस्वच्छताभियानस्य प्रशंसां कृतवान्। प्रधानमन्त्री मोदी जनकल्याणाय निरन्तरसमर्पणस्य कृते दलकार्यकर्तॄणामपि प्रशंसां कृतवान्।

इतः पूर्वम् अद्य प्रधानमन्त्री मोदी वडोदरायां पञ्चत्रिंशत्सहस्र-कोटिरूप्यतोप्यधिकमूल्यानां विभिन्नविकासपरियोजनानाम् उद्घाटनं शिलान्यासं च कृतवान्।

प्रधानमन्त्री-हज़ारिका

असम-विधानसभायाः भूतपूर्व-सदस्याय विश्रुत-सङ्गीतज्ञाय भारतरत्नविभूषिताय डॉ. भूपेन-हजारिका-महोदयाय तस्य शततमे जन्म-जयन्त्यवसरे प्रधानमन्त्री नरेन्द्र-मोदी, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, रक्षामन्त्री राजनाथ-सिंहः, गृहमन्त्री अमित-शाहश्च अद्य स्वकीयां भावपूर्णां श्रद्धाञ्जलिं समार्पयन्। साम्प्रदायिक-सञ्चार-पटलीयसन्देशे प्रधानमन्त्रिणा श्रीमोदिना प्रत्यपादि यत् डॉ. हजारिका-महोदयस्य स्वर-माधुरी असम-प्रदेशस्य आत्मानं, पूर्वोत्तर-भारतस्य च सांस्कृतिक-चैतन्यं समग्र-राष्ट्रे प्रासारयत्।

अपरस्मिन् सन्देशे उपराष्ट्रपतिना राधाकृष्णन् इत्यमुना न्यरूप्यत यत् स्वीयेन आत्म-स्पर्शिना सङ्गीतेन, ओजस्विभिः शब्दैश्च डॉ. हजारिका असमस्य, पूर्वोत्तर-भारतस्य, अथ च विशाल-मानव-संवेदनानां जीवन्तरूपं सङ्गीत-बद्धम् अकरोत्।

न्यायालयः - राहुलगान्धी

बॉम्बे-उच्चन्यायालयेन अद्य प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति नवदशोत्तरद्वि-सहस्रतमे वर्षे प्रदत्तं वक्तव्यं सम्बद्धे मानहानिप्रकरणे काङ्ग्रेस्-सांसदस्य राहुलगान्धिनः विरुद्धं प्रख्यापितस्य समाह्वानपत्रस्य निरस्तीकरणं निराकृतम्।

न्यायमूर्तिनः एन्. आर्. बोरकर् इत्यस्य एकलपीठेन राहुलगान्धिनः सा याचिका निरस्तीकृता, यस्यां तेन स्वविरुद्धं न्यायालयेन प्रारब्धस्य कार्याचरणस्य आदेशः आक्षिप्तः आसीत्।

तथापि उच्चन्यायालयेन एकविंशत्युत्तर-द्विसहस्रतमे वर्षे प्रदत्तः स्वस्य सः निर्देशः यथावत् स्थापितः, यस्य अन्तर्गतं दण्डाधिकारिणः पुरतः श्रवणं षड्-सप्ताहं यावत् स्थगितम् आसीत्। अनेन राहुलगान्धी उच्चतमन्यायालयं प्रति गन्तुं अवसरं प्राप्स्यति।

इदं प्रकरणम् अष्टादशाधिक-द्विसहस्रतमे वर्षे राफेल्-सन्धि-विषये राहुलगान्धिना प्रदत्ते वक्तव्यसम्बद्धे प्रस्तुत-मानहानि-याचिकायाम् आधारितम् अस्ति।

न्यायालय-छात्रावासः

दिल्ली-उच्च-न्यायालयेन अद्य दिल्ली-विश्वविद्यालयस्य सर्वेषु महाविद्यालयेषु छात्रावास-सौविध्यस्य व्यवस्थापनार्थं समुपस्थापितायाः जनहित-याचिकायाः तात्कालिक-वादश्रवणस्य अभ्यर्थना प्रत्याख्याता । न्यायालयेन संशयः प्रकटितः यत् किं प्राथमिक-दृष्ट्या अथ अन्तर्वर्ति-काले एतादृशः निर्देशः दातुं शक्यते? न्यायालयः प्रत्यवोचत् यत् याचिकाकर्तृभिः एषा याचिका श्वः स्वतः-सूचीकरण-प्रक्रियायै उपस्थापनीया। अवधेयमिदं यत् दिल्ली-विश्वविद्यालयस्य दक्षिण-परिसरस्य निकटे सत्यनिकेतन-क्षेत्रे एकस्य वास-भवनस्य पतनेन सप्तजनानां निधनानन्तरम् एषा याचिका न्यायालये समुत्थापिता आसीत्।

राजनाथसिंहस्य श्रीलङ्कायात्रा

रक्षामन्त्री राजनाथसिंहः अद्य त्रिदिवसीय-श्रीलङ्कायात्रायै कोलम्बोनगरं सम्प्राप्तवान्। तस्य यात्रा भारत-श्रीलङ्कयोः मध्ये द्विपक्षीयरक्षासहकारस्य सामुद्रिकसहकारस्य च सुदृढीकरणोद्देश्येन आयोजिता अस्ति। श्रीलङ्कायाः बण्डारनायके-अन्ताराष्ट्रिय-विमानस्थानके श्रीसिंहस्य श्रीलङ्कायाः उपरक्षामन्त्री अरुणा जयशेखरः श्रीलङ्कायां भारतस्य उच्चायुक्तः सन्तोष-झाः च हार्दं स्वागतं कृतवन्तौ। स्वयात्रावधौ रक्षामन्त्री श्रीलङ्कायाः नेतृत्वेन सह विविधेषु विषयेषु वार्तां करिष्यति। अस्याः वार्तायाः उद्देश्यं परस्परहितसम्बद्धेषु क्षेत्रेषु द्विपक्षीयसम्बन्धानां सुदृढीकरणम् अस्ति। सः कोलम्बोनगरे भारतीयप्रवासि-समुदायस्य सदस्यैः सह संवादमपि करिष्यति।

ऋतुविभागः

भारतीय-ऋतु-विज्ञान-विभागेन अद्य बिहारे, पूर्व-मध्य-प्रदेशे, पूर्व-उत्तर-प्रदेशे, ओडिशायाम्, पश्चिम-बङ्गाले, अथ च देशस्य पूर्वोत्तर-भागेषु अतीव प्रबल-वृष्टेः पूर्वानुमानं प्रकटितम्। ऋतु-विज्ञान-विभागेन श्वः यावत् अण्डमान-निकोबार-द्वीपसमूहेषु, बिहारे, ओडिशायां, हिमालय-तटीय-पश्चिम-बङ्गाले , सिक्किमे, तेलङ्गानायां च मेघ-गर्जनम्, विद्युत्-सम्पातः , अथ च प्रचण्डसमीरश्च प्रवहेदिति सम्भावितम्।

दिव्याङ्ग-धनुर्क्रीडा

अहमदाबादे अनुष्ठीयमानायाः विश्व-दिव्याङ्ग-धनुर्क्रीडायाः तृतीय-चरणस्य उपान्तिमे दिवसे भारतीय-धनुर्धरैः त्रीणि पदकानि हस्तगतानि कृतानि। पुरुष-विभागे तोमन-कुमारः, श्यामसुन्दर-स्वामी च पुरुष-कम्पाउण्ड्-दल-स्पर्धायां सुवर्ण-पदकम् अवाप्तवन्तौ। तथैव पुरुष-रिकर्व-दल-स्पर्धायां पैरिस-पैरालम्पिक-विजेता हरविन्दर-सिंहः, विजय-सुण्डी च स्वकीयेन उत्कृष्ट-प्रदर्शनेन अपरं सुवर्ण-पदकम् व्यजयताम्। महिलानां रिकर्व-दल-स्पर्धायां भावना, पूजा च रजत-पदकं प्राप्तवत्यौ। परञ्च महिला-कम्पाउण्ड्-दल-स्पर्धायां कांस्य-पदक-द्वन्द्वे भारतं पराजितं सत् कांस्य-पदकात् वञ्चितम् ।

॥ इति वार्ताः ॥